**दिनाङ्क : 07/01/2025** **सायम् - 06:20**

**आदौ मुख्यवार्ता:**

- प्रधानमन्त्री नरेन्द्रमोदी सूचितवान् यत् पंचविंशत्यधिकद्विसहस्रतमवर्षीय: प्रारूपगत-आंककीय-वैयक्तिक-दत्तांश-संरक्षण-नियमः नागरिक-केन्द्रित-शासनं प्रति भारतस्य प्रतिबद्धतायै प्राधान्यम् प्रददाति।
- गृहमन्त्री अमितशाह: अद्य नवदिल्ल्याम् केन्द्रीयान्वेषणविभागद्वारा विकसितस्य निर्मितस्य च भारतपोल-इत्यभिनामधेयकस्य आन्तर्जालिकपटलस्य शुभारम्भं कृतवान्।
- निर्वाचनायोगेन समुद्घोषितम् यत् दिल्ली-विधानसभा-निर्वाचनम् एकस्मिन्नेव चरणे फरवरीमासस्य पञ्चमे दिनाङ्के समनुष्ठास्यते तत्रैव मतगणना अष्टमे दिनाङ्के निर्धारितास्ति।
- नेपाल-तिब्बतयो: सीम्नि सप्त दशमलव एकं तीव्रस्तरीयेन भूकम्पेन पञ्चनवतिजना: मृत्युमुपगता:।

**प्रधानमन्त्री**

प्रधानमन्त्री नरेन्द्रमोदी सूचितवान् यत् पञ्चविंशत्यधिकद्विसहस्रतमवर्षीय: प्रारूपगत-आङ्ककीय-वैयक्तिक-दत्तांश-संरक्षण-नियमः नागरिक-केन्द्रित-शासनं प्रति भारतस्य प्रतिबद्धतायै प्राधान्यम् प्रददाति। सूचनाप्रसारणमन्त्रिणः

अश्विनी-वैष्णवस्य सन्देशस्य प्रत्युत्तरे श्रीमोदी अवधानं दत्तवान् यत् नियमानां उद्देश्यं वैयक्तिक-दत्तांशस्य रक्षणं भवति तथा च विकासस्य समावेशस्य च प्रोत्साहनं भवति इति।

## अमित शाहः-भारतपोलइति

गृहमन्त्री अमितशाहः अद्य नवदिल्ल्याम् केन्द्रीयान्वेषणविभागद्वारा विकसितस्य निर्मितस्य च भारतपोल-इत्यभिनामधेयकस्य आन्तर्जालिकपटलस्य शुभारम्भं कृतवान्। अस्य भारतपोल् इत्याख्यस्य पटलस्योद्देश्यं इण्टरपोलइत्यनेन माध्यमेन अन्ताराष्ट्रिय-सहायतायै सर्वेषु अनुरोधेषु कार्याचरणं सुव्यस्थितं-करणमिति वर्तते। यस्मिन् रेडनोटिस इति सम्बद्धानि नैकानि प्रतिवेदनानि समाविष्टानि सन्तीति। अत्रावसरे गृहमन्त्री अमितशाहः स्वीयोद्बोधने अकथयत् यत् भारतपोल् इति अन्ताराष्ट्रिय-स्तरीयं निरीक्षणं नवीनं युगं प्रति नेष्यति। असौ पुनः न्यगादीत् यत् साम्प्रतम् अन्वेषण-विभागाः आवश्यक-सूचनाः प्राप्तुं इण्टरपोल इत्यनेन सङ्घटनेन संयोजिताः भवितुं शक्नुवन्ति। श्रीशाहः अग्रे अवोचत् यत् अनेन पदक्षेपेण आतङ्कवादसम्बद्धेभ्यः अपराधेभ्यः मादकपदार्थेभ्यः इत्यादिभ्यः प्रसङ्गेभ्यः निवारणं मेलिष्यति।

अत्रावधौ गृहमन्त्रिणा प्रोदिरितं यत् अधुना आधुनिक-प्रणालीनाम् उपयोगद्वारा विदेशेषु निवसन्त: अपराधिन: भारते च अपराधान् कृत्वा विदेशान् प्रति गतान् अपराधिन: प्रत्यानेतुं सरलता भविष्यति।

अपरत्र श्रीशाह: पञ्चत्रिंशत्सङ्ख्यकेभ्य: केन्द्रीयान्वेषण-विभागीयेभ्य: अधिकारिभ्य: कर्मचारिभ्यश्च आरक्षिपदकानि प्रदत्तवान्। एतेभ्य: पदकलब्धेभ्य: जनेभ्य: विशिष्टसेवायै राष्ट्रपते: आरक्षि-पदकानि अपि च निरीक्षणे उत्कृष्टतायै केन्द्रीयगृहमन्त्रिण: पदकानि प्रदत्तानि।

## निर्वाचनायोग:-दिल्ली विधानसभा

दिल्ली-विधानसभा-निर्वाचनं एकस्मिन्नेव चरणे फरवरीमासस्य पञ्चमे दिनाङ्के समनुष्ठास्यते तत्रैव मतगणना अष्टमे दिनाङ्के निर्धारितास्ति। निर्वाचनायोगेन अद्य सप्तति-सदस्य-युताया: दिल्लीविधानसभाया: निर्वाचनाय समुद्घोषणा कृता। अद्य नवदिल्ल्यां वार्ताहरान् संसूचयन् मुख्यनिर्वाचना-युक्त: राजीवकुमार: अकथयत् यत् सम्बद्धाधिसूचना अस्य मासस्य दशमे दिनाङ्के प्रख्यापयिष्यते। मुख्यनिर्वाचनायुक्तेन ईवीएम् यन्त्रसम्बद्धान् आरोपान् अपि निराकृता:।

**नेपालभूकम्पः**

अद्य प्रात: काले नेपाल-तिब्बतयो: सीम्नि सप्त दशमलव एकं तीव्रस्तरीयेन भूकम्पेन पञ्चनवतिजना: मृत्युमुपगता: तत्रैव त्रिंशदधिकैकशतजना: व्रणिता: अभवन्। अस्य भूकम्पस्य केन्द्रं नेपालसीम्न: समीपे तिब्बतस्य शिजांगस्थलम् आसीत्। येन हि बिहार-पश्चिमबङ्गाल-सिक्किमराज्यानि समेत्य उत्तरभारतस्य अनेकेषु भागेषु कम्पनम् जनै: अनुभूतम्।

**असम-दुर्घटना**

असमप्रशासनेन दिमा-हसाओ-जनपदस्य उमराङ्गसो-नगरस्य कृष्णाङ्गार-आकरे अवरूद्धानां खनितृणां सहायतायै नौसैन्यबलस्य गाहितृन् तत्र नियोजयितुं सम्प्रार्थिता:। त्रिशतफुटपरिमिते जलप्लाविते **रट्होल** इत्यत्र कृष्णाङ्गार-आकरे एते खनितार: अवरूद्धास्सन्ति इति सूच्यते। सेनया राज्यापात्मोचनबल-राष्ट्रियापत्मोचन-बलाभ्यां सह संयुक्तरूपेण साहाय्योद्धारकार्याणि समारब्धानि।

**एच. एम. पी. वी.-संक्रमणम्**

केन्द्र-स्वास्थ्य-सचिवः पुण्य-सलिला-श्रीवास्तव इत्येषा कथितवती यत् ह्युमन्-मेटान्यूमो-वायरस एच्. एम्. पी. वी. इत्येतत् सङ्क्रमणं जनानां कृते चिन्तायाः कारणं नास्ति। राज्यैः केन्द्रशासितप्रदेशैः च सह दृश्य-श्रव्य-परान्तर्जालीयोपवेशने स्वास्थ्य-

सचिवः भारते श्वसन-रोगाणां वर्तमानस्थितिं, एच्. एम्. पी. वी. प्रकरणानां स्थितिं, च प्रबन्धयितुं सार्वजनिक-स्वास्थ्य-उपायान् च समीक्षितवती। एषा राज्यानि इन्फ्लूएन्ज़ा-सदृशस्य रोगस्य, तीव्र-श्वसन-सङ्क्रमणस्य च निरीक्षणं सुदृढ-समीक्षां च कर्तुं संसूचितवती। अनया एतदपि कथितं यत् सामान्यतया शीतमासेषु श्वसनरोगाणां वृद्धिः दृश्यते इति, तथा च आश्वासितं यत् श्वसनरोगस्य कस्यैचिदपि सम्भाव्यवृद्धये देशः सुसज्जः अस्ति। अत्रान्तरे, पश्चिमीय-महाराष्ट्रे, नागपुरे च एच्. एम्. पि. वि. इत्यस्य द्वे प्रकरणे समङ्किते। द्वयोः प्रकरणयोः सप्तवर्षीयः त्रयोदशवर्षीयः च बालकौ सम्मिलितौ।

## भारतीय-नागरिक-सुरक्षा

केन्द्रेण राज्यानि केन्द्रशासितप्रदेशाः च त्रयोविंशत्यधिक-द्विसहस्र-तम्याः भारतीय-नागरिक-सुरक्षा-संहितायाः नवसप्तत्यधिक-चतुश्शत-परिच्छेदस्य उपबन्धानां प्रवर्तनाय निर्दिष्टम्, येन निगडितेभ्यः जनेभ्यः साहाय्यं भविष्यति। अयं प्रभागः अन्वीक्षार्थं प्रतीक्षमाणानां कारागारवासिनां सङ्ख्यां न्यूनीकृत्य निगडितेभ्यः जनेभ्यः साहाय्यं प्रददाति। केन्द्रीय-गृह-मन्त्रालयः अस्मिन् विषये सर्वेषां राज्यानां केन्द्रशासितप्रदेशानां च मुख्यसचिवान् उद्दिश्य पत्रम् अलिखत्। नूतनस्य नियमस्य अन्तर्गतं, प्रथमवारम् अपराधं कुर्वन्तः अपराधिनः अधिकतमस्य कारावासस्य तृतीयांशस्य सेवाः प्रदानानन्तरं बन्धपत्रे मुक्ताः भवितुम् अर्हन्ति।

**एयरचीफ-प्रमुख:**

वायुसेनाध्यक्ष: एयर्-चीफ्-मार्शल् ए. पी. सिंह: अत्याधुनिक-स्वदेशिक-प्रौद्योगिकीनां विकासाय, विनिर्माण-क्षमतानां निर्माणाय च बलं प्रदत्तवान्। असौ अवदत् यत् सप्तचत्वारिंशदधिक-द्विसहस्रतमे वर्षे विकसित-भारतस्य लक्ष्यं साधयितुं रक्षाक्षेत्रस्य एयरोस्पेस इत्येतस्य क्षेत्रस्य च प्रमुखं योगदानं भविष्यति। एतद् वक्तव्यम् असौ अद्य नवदिल्ल्यां 'atmanirbharta in aerospace : way ahead' इत्येतस्मिन् विषये आयोजिते एकविंशतितमे सुब्रोतो-मुखर्जी-सम्मेलने प्रदत्तवान्।

**कृषका:-शिवराज:**

दिल्ल्या: कृषका: अद्य नवदिल्ल्यां केन्द्रीयकृषिकृषककल्याणमन्त्रिणा शिवराजसिंह चौहानेन सह मेलनं कृतवन्त:। तदनु श्रीचौहानेन वार्ताहरै: सह सम्भाषयता उक्तं यत् केन्द्रप्रशासनस्य विभिन्नानां योजनानां लाभ: राष्ट्रियराजधान्या: कृषका: नैव प्राप्नुवन्ति तावत् एतस्मिन् सन्दर्भे दिल्ल्या: मुख्यमन्त्रिणं आतिशि इत्येतां प्रति एकं पत्रं विलिखितम्।

**ऋतुविभाग:**

भारतीयऋतु विज्ञानविभागेन हिमाचल प्रदेश-पश्चिमराजस्थानयो: अनेकेषु भागेषु शीतलहरी अनुमानिता। बिहार-पञ्जाब-हरियाणा-चण्डीगढ-हिमाचलप्रदेश-

उत्तरप्रदेश-राज्याणां केषुचित् भागेषु श्व: यावत् प्रात: समये सघन नीहारो भविष्यति इति सम्भाव्यते।